# Shri Shivamangala Stotram

# શ્રીશિવમઙ્ગલસ્તોત્રમ્

## Document Information

Text title : Shri Shivamangala Stotram 02 01

File name : shivamangalastotram.itx

Category : shiva, mangala, stotra

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-01

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

# શ્રીશિવમઙ્ગલસ્તોત્રમ્

મઙ્ગલં ભગવાન્ શમ્ભુર્મઙ્ગલં પુરશાસનઃ ।
મઙ્ગલં સોમસૂર્યાગ્નિલોચનો મમ મઙ્ગલમ્ ॥ ૧॥

યન્મઙ્ગલં કુમારસ્ય ગિરિજાકલ્પયત્ પુરા ।
તારકં જેતુકામસ્ય તન્મે ભવતુ મઙ્ગલમ્ ॥ ૨॥

મઙ્ગલં પાર્વતીનાથો મઙ્ગલં જાહ્નવીધરઃ ।
મઙ્ગલં ગિરિજા દેવી મઙ્ગલં સર્વમઙ્ગલમ્(લા) ॥ ૩॥

ગિરીન્દ્રસ્ય ચ મેનાયાસ્ત્રૈલોક્યસ્ય તપઃફલે ।
પાર્વત્યા જન્મદિવસે તન્મે ભવતુ મઙ્ગલમ્ ॥ ૪॥

ત્રિપુરં હન્તુકામસ્ય દિધક્ષોરન્ધકાસુરમ્ ।
ભવાન્યા યત્કૃતં ભર્તુસ્તન્મે ભવતુ મઙ્ગલમ્ ॥ ૫॥

ઈશ્વરાજ્ઞાનુયાતસ્ય વીરભદ્રસ્ય શૂલિના ।
યત્કૃતં મઙ્ગલં કાર્યં તન્મે ભવતુ મઙ્ગલમ્ ॥ ૬॥

હારભૂષણકેયૂરલીલાભુજગભૂષયોઃ ।
શિવયોઃ સદૃશોદ્વાહે તન્મે ભવતુ મઙ્ગલમ્ ॥ ૭॥

યઃ શિવો નામરૂપાભ્યાં યા દેવી સર્વમઙ્ગલા ।
તયોઃ સંસરણાત્ પુંસાં સર્વતો જયમઙ્ગલમ્ ॥ ૮॥

॥ ઇતિ શ્રીશિવમઙ્ગલસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*